श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे

# ॥ पञ्चपञ्चाशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ पञ्चपञ्चाशः सर्गः ॥

## रावणः सीतां स्वान्तःपुरं दर्शयित्वा त्वं मे भार्या भवेति प्रैरयत्

सन्दिश्य राक्षसान् घोरान् रावणोऽष्टौ महाबलान्।
आत्मानं बुद्धिवैक्लव्यात् कृतकृत्यममन्यत ॥ **3.55.1** ॥

स चिन्तयानो वैदेहीं कामबाणैः प्रपीडितः।
प्रविवेश गृहं रम्यं सीतां द्रष्टुमभित्वरन् ॥ **3.55.2** ॥

स प्रविश्य तु तद्वेश्म रावणो राक्षसाधिपः।
अपश्यद् राक्षसीमध्ये सीतां दुःखपरायणाम् ॥ **3.55.3** ॥

अश्रुपूर्णमुखीं दीनां शोकभारावपीडिताम्।
वायुवेगैरिवाक्रान्तां मज्जन्तीं नावमर्णवे ॥ **3.55.4** ॥

मृगयूथपरिभ्रष्टां मृगीं श्वभिरिवावृताम्।
अधोगतमुखीं सीतां तामभ्येत्य निशाचरः ॥ **3.55.5** ॥

तां तु शोकवशाद् दीनामवशां राक्षसाधिपः।
स बलाद् दर्शयामास गृहं देवगृहोपमम् ॥ **3.55.6** ॥

हर्म्यप्रासादसम्बाधं स्त्रीसहस्रनिषेवितम्।
नानापक्षिगणैर्जुष्टं नानारत्नसमन्वितम् ॥ **3.55.7** ॥

दान्तकैस्तापनीयैश्च स्फाटिकै राजतैस्तथा।
वज्रवैदूर्यचित्रैश्च स्तम्भैर्दृष्टिमनोरमैः॥ 3.55.8 ॥

दिव्यदुन्दुभिनिर्घोषं तप्तकाञ्चनभूषणम्।
सोपानं काञ्चनं चित्रमारुरोह तया सह॥ 3.55.9 ॥

दान्तका राजताश्चैव गवाक्षाः प्रियदर्शनाः।
हेमजालावृताश्चासंस्तत्र प्रासादपङ्क्तयः॥ 3.55.10 ॥

सुधामणिविचित्राणि भूमिभागानि सर्वशः।
दशग्रीवः स्वभवने प्रादर्शयत मैथिलीम्॥ 3.55.11 ॥

दीर्घिकाः पुष्करिण्यश्च नानापुष्पसमावृताः।
रावणो दर्शयामास सीतां शोकपरायणाम्॥ 3.55.12 ॥

दर्शयित्वा तु वैदेहीं कृत्स्नं तद्भवनोत्तमम्।
उवाच वाक्यं पापात्मा सीतां लोभितुमिच्छया॥ 3.55.13 ॥

दश राक्षसकोट्यश्च द्वाविंशतिरथापराः।
वर्जयित्वा जरावृद्धान् बालांश्च रजनीचरान्॥ 3.55.14 ॥

तेषां प्रभुरहं सीते सर्वेषां भीमकर्मणाम्।
सहस्रमेकमेकस्य मम कार्यपुरःसरम्॥ 3.55.15 ॥

यदिदं राज्यतन्त्रं मे त्वयि सर्वं प्रतिष्ठितम्।
जीवितं च विशालाक्षि त्वं मे प्राणैर्गरीयसी॥ 3.55.16 ॥

बह्वीनामुत्तमस्त्रीणां मम योऽसौ परिग्रहः।
तासां त्वमीश्वरी सीते मम भार्या भव प्रिये॥ 3.55.17 ॥

साधु किं तेऽन्यथाबुद्ध्या रोचयस्व वचो मम।
भजस्व माभितप्तस्य प्रसादं कर्तुमर्हसि॥ 3.55.18 ॥

परिक्षिप्ता समुद्रेण लङ्केयं शतयोजना।
नेयं धर्षयितुं शक्या सेन्द्रैरपि सुरासुरैः ॥ **3.55.19** ॥

न देवेषु न यक्षेषु न गन्धर्वेषु नर्षिषु।
अहं पश्यामि लोकेषु यो मे वीर्यसमो भवेत् ॥ **3.55.20** ॥

राज्यभ्रष्टेन दीनेन तापसेन पदातिना।
किं करिष्यसि रामेण मानुषेणाल्पतेजसा ॥ **3.55.21** ॥

भजस्व सीते मामेव भर्ताहं सदृशस्तव।
यौवनं त्वध्रुवं भीरु रमस्वेह मया सह ॥ **3.55.22** ॥

दर्शने मा कृथा बुद्धिं राघवस्य वरानने।
कास्य शक्तिरिहागन्तुमपि सीते मनोरथैः ॥ **3.55.23** ॥

न शक्यो वायुराकाशे पाशैर्बद्धुं महाजवः।
दीप्यमानस्य वाप्यग्नेर्ग्रहीतुं विमलाः शिखाः ॥ **3.55.24** ॥

त्रयाणामपि लोकानां न तं पश्यामि शोभने।
विक्रमेण नयेद् यस्त्वां मद्बाहुपरिपालिताम् ॥ **3.55.25** ॥

लङ्कायाः सुमहद्राज्यमिदं त्वमनुपालय।
त्वत्प्रेष्या मद्विधाश्चैव देवाश्चापि चराचरम् ॥ **3.55.26** ॥

अभिषेकजलक्लिन्ना तुष्टा च रमयस्व च।
दुष्कृतं यत्पुरा कर्म वनवासेन तद्गतम् ॥ **3.55.27** ॥

यच्च ते सुकृतं कर्म तस्येह फलमाप्नुहि।
इह सर्वाणि माल्यानि दिव्यगन्धानि मैथिलि ॥ **3.55.28** ॥

भूषणानि च मुख्यानि तानि सेव मया सह।
पुष्पकं नाम सुश्रोणि भ्रातुर्वैश्रवणस्य मे ॥ **3.55.29** ॥

विमानं सूर्यसङ्काशं तरसा निर्जितं रणे।
विशालं रमणीयं च तद्विमानं मनोजवम्॥ **3.55.30** ॥

तत्र सीते मया सार्धं विहरस्व यथासुखम्।
वदनं पद्मसङ्काशं विमलं चारुदर्शनम्॥ **3.55.31** ॥

शोकार्तं तु वरारोहे न भ्राजति वरानने।
एवं वदति तस्मिन् सा वस्त्रान्तेन वराङ्गना॥ **3.55.32** ॥

पिधायेन्दुनिभं सीता मन्दमश्रूण्यवर्तयत्।
ध्यायन्तीं तामिवास्वस्थां सीतां चिन्ताहतप्रभाम्॥ **3.55.33** ॥

उवाच वचनं वीरो रावणो रजनीचरः।
अलं व्रीडेन वैदेहि धर्मलोपकृतेन ते॥ **3.55.34** ॥

आर्षोऽयं देवि निष्पन्दो यस्त्वामभिभविष्यति।
एतौ पादौ मया स्निग्धौ शिरोभिः परिपीडितौ॥ **3.55.35** ॥

प्रसादं कुरु मे क्षिप्रं वश्यो दासोऽहमस्मि ते।
इमाः शून्या मया वाचः शुष्यमाणेन भाषिताः॥ **3.55.36** ॥

न चापि रावणः काञ्चिन्मूर्ध्ना स्त्रीं प्रणमेत ह।
एवमुक्त्वा दशग्रीवो मैथिलीं जनकात्मजाम्।
कृतान्तवशमापन्नो ममेयमिति मन्यते॥ **3.55.37** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे पञ्चपञ्चाशः सर्गः॥